श्री दत्तात्रेय ध्यानं

श्री दत्तात्रेय ध्यानं

दत्तात्रेयं शिवं शांतं सच्चिदानंदमद्वयं |
आत्मरूपं परं दिव्यमवण्यमुपास्महे ||1||

दत्तात्रेयं शिवं शांतमिंद्रनीलनिभं प्रभुं |
आत्ममायारतं देवं अवधूतं दिगंबरं ||2||

भस्मोद्धूलितसर्वांगं जटाजूटधरं विभुं |
चतुर्बाहुमुदारांगं प्रफुल्लकमलेक्षणं ||3||

ज्ञानयोगनिधिं विश्वगुरुं योगिजनप्रियं |
भक्तानुकंपनं सर्वसाक्षिणं सिद्धसेवितं ||4||

जटाधरं पांडुरंगं शूलहस्तं कृपानिधिं | (पांडुरांगं)
सर्वरोगहरं देवं दत्तात्रेयमहं भजे ||5||

माला कमंडलुरधः करपद्मयुग्मे
मध्यस्थपाणियुगले डमरुत्रिशूले |
यन्न्यस्त ऊर्ध्वकरयोः शुभशंखचक्रे
वंदे तमत्रिवरदं भुजषट्क युक्तं ||6||

इति श्रीदत्तात्रेयध्यानं संपूर्णं |